प्र सम्राजे (०५ ८५)

प्र सम्राजे बृहद् अर्चा गभीरम् ब्रह्म प्रियं वरुणाय श्रुताय ।
वि यो जघान शमितेव चर्मोपस्तिरे पृथिवी सूर्याय ॥ ५-०८५-०१

वनेषु व्य् अन्तरिक्षं ततान वाजम् अर्वत्सु पय उस्त्रियासु ।
हृत्सु क्रतुं वरुणो अप्स्व् अग्निं दिवि सूर्यम् अदधात् सोमम् अद्रौ ॥ ५-०८५-०२

नीचीनबारं वरुणः कवन्धम् प्र ससर्ज रोदसी अन्तरिक्षम् ।
तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर् व्य् उनत्ति भूम ॥ ५-०८५-०३

उनत्ति भूमिम् पृथिवीम् उत द्यां यदा दुग्धं वरुणो वष्ट्य् आद् इत् ।
सम् अभ्रेण वसत पर्वतासस् तविषीयन्तः श्रथयन्त वीराः ॥ ५-०८५-०४

इमाम् ऊ ष्व् आसुरस्य श्रुतस्य महीम् मायां वरुणस्य प्र वोचम् ।
मानेनेव तस्थिवाअन्तरिक्षे वि यो ममे पृथिवी सूर्येण ॥ ५-०८५-०५

इमाम् ऊ नु कवितमस्य मायाम् मही देवस्य नकिर् आ दधर्ष ।
एकं यद् उद्ना न पृणन्त्य् एनीर् आसिञ्चन्तीर् अवनयः समुद्रम् ॥ ५-०८५-०६

अर्यम्यं वरुण मित्र्यं वा सखायं वा सदम् इद् भ्रातरं वा ।
वेशं वा नित्यं वरुणारणं वा यत् सीम् आगश् चकृमा शिश्रथस् तत् ॥ ५-०८५-०७

कितवासो यद् रिरिपुर् न दीवि यद् वा घा सत्यम् उत यन् न विद्म ।
सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥ ५-०८५-०८